International Journal of Sanskrit Research 2019; 5(5): 214-223

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(5): 214-223
© 2019 IJSR
www.anantaajournal.com
Received: 28-07-2019
Accepted: 30-08-2019

**बिनोद् कार्त्तिकेयन्**
शोधच्छात्रः, संस्कृताध्ययनविभागः,
रामकृष्णमिशन्-विवेकानन्द-
शैक्षिकशोधसंस्था, बेलुरमठः, पश्चिमवङ्गाः,
भारत

Correspondence
**बिनोद् कार्त्तिकेयन्**
शोधच्छात्रः, संस्कृताध्ययनविभागः,
रामकृष्णमिशन्-विवेकानन्द-
शैक्षिकशोधसंस्था, बेलुरमठः, पश्चिमवङ्गाः,
भारत

# शाङ्करसायणभाष्यदिशा भार्गवी वारुणी विद्या

**बिनोद् कार्त्तिकेयन्**

## भूमिका

कैवल्यप्रदा ब्रह्मविद्या तत्तदुपनिषत्प्रकरणेषु नानानामधेयैरुपन्यस्ता दरीदृश्यते। कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदः भृगुवल्ल्यां[1] सा भार्गवी वारुणी विद्या इति नाम्ना श्रुत्यैवाभिहिता।[2] इयं विद्या तैत्तिरीयकोपनिषदो ब्रह्मानन्दवल्ल्यां[3] श्रुतया विद्यया सम्बद्धा। शाङ्करभाष्येण यथा सायणभाष्येणापि मण्डिताऽस्ति तैत्तिरीयोपनिषदिति भाष्यद्वयीमाश्रित्य भार्गवी वरुणी विद्या सप्रत्यनुवाकभाष्यविचारं सभाष्यगतविशिष्टविचारोल्लेखञ्च प्रस्तूयते। शङ्करभगवत्पादकालानन्तरागतैः आचार्यैः श्रुत्यर्थनिरूपणाय समाश्रितायाः सरणेः स्वरूपविचारप्रसङ्गे शाङ्करसायणभाष्यदिशा क्रियमाणस्य अस्य अध्ययनस्य फलम् उपकारकम् भविष्यति।

## भृगुवल्लीगतविषयाणाम् भाष्यद्वये कृतमुपबृंहणम्।

### भूमिकाभाष्यम्।

शाङ्करभाष्यानुसारम् ब्रह्मविद्यायाम् ब्रह्मानन्दवल्ल्याम् परिसमाप्तायाम् ब्रह्मविद्यासाधनभूतं तपः अन्नादिविषयाण्युपासनानि च वक्तव्यानीत्यतो भृगुवल्ली समारभ्यते।[4] पितृपुत्रसंवादरूपायाः आख्यायिकायाः विद्यास्तुतिपरत्वं शङ्करभगवत्पादाः यथारीति[5] अत्राप्याहुः।[6]

---

1 तैत्तिरीयारण्यकस्य नवमप्रपाठक एव भृगुवल्लीति ख्याता।

2 द्र. "सैषा भार्गवी वारुणी विद्या" (तै.उ. ३.६.१)

3 तैत्तिरीयारण्यकस्य अष्टमप्रपाठको ब्रह्मानन्दवल्लीति प्रसिद्धा।

4 तै.उ.शा.भा. (शा.ग्र. भागः ८) पृ.७२९

5 अन्यासाम् उपनिषदाम् भाष्येऽपि शङ्करभगवत्पादैः तत्रत्याख्यायिकायाः विद्यास्तुतिपरत्वम् प्रख्यापितम्।

6 तै.उ.शा.भा. (शा.ग्र. भागः ८) पृ.७३०

श्रीसायणाचार्याः अपि भृगुवल्लीभूमिकायां तावद् ब्रह्मविद्यायाः ब्रह्मानन्दवल्ल्यां निरूपितायाः अन्तरङ्गसाधनानि निरूप्यन्त इत्याहुः।[7] पारिप्लवाधिकरणं[8] समाश्रित्य च पितापुत्राख्यायिकायाः ब्रह्मविद्यास्तुत्यर्थत्वम् शङ्करभगवत्पादैः भृगुवल्लीभाष्यारम्भे बोधितम् मीमांस्य समर्थितम्।[9]

प्रथमानुवाकभाष्यम्।

शङ्करभगवत्पादैरनुवाकार्थं इत्थमुपवर्णितः – ब्रह्मजिज्ञासुः भृगुर्वारुणिः स्वस्य पितरं वरुणं विधिवदुपसृत्य ब्रह्म कथयेत्युवाच। वरुणश्च भृगवे पुत्राय अन्नप्राणचक्षुःश्रोत्रमनोवाग्रूपाणि ब्रह्मोपलब्धौ द्वाराण्युक्तवान्। ततश्च सर्वाणि भूतानि उत्पत्तिस्थितिलयकालेषु यदात्मतां न जहति तद्ब्रह्म अन्नादिद्वारेण प्रतिपद्यस्व इत्यर्थत उपदिदेश। पितुर्वरुणस्य सकाशाद् ब्रह्मोपलब्धिसाधनानि ब्रह्मलक्षणञ्च श्रुत्वा भृगुः ब्रह्मोपलब्धिसाधनत्वेन तप आचरितवानिति।[10]

सायणाचार्यमते अनुवाकस्यास्य विषयास्तावत् – "भृगुर्वै वारुणिः...ब्रह्मेति" इति विद्यास्तुत्यर्थमुपाख्यानम्, "तस्मा एतत्... वाचमिति" इति ब्रह्मबोधद्वारोपदेशः, "तं होवाच... तद् ब्रह्मेति" इति ब्रह्मलक्षणविचारयोरुपदेशः, "स तपोऽतप्यत। स तपस्तप्त्वा" इति उर्ध्वरेतआश्रमधर्माचरणरूपस्य ऐकाग्र्यरूपस्य च तपसो ब्रह्मज्ञानहेतुत्वप्रदर्शनञ्चेति।[11]

**द्वितीयानुवाकभाष्यम्।**

शाङ्करभाष्यानुसारम् अनुवाकार्थस्तावदित्थम् – तपसा भृगुः अन्नम् ब्रह्मेति विज्ञातवान्, यतो ह्यन्नं यथोक्तब्रह्मलक्षणोपेतमस्ति। ऐकाग्र्यरूपं तपः समाश्रित्य लक्षणेन उपपत्त्या[12] च भृगुरेवम् अन्नम् ब्रह्मेति विज्ञाय पुनः शङ्कमानः वरुणम् पितरमुपगम्य यथापूर्वम् ब्रह्म कथयेत्युवाच। पिता च तस्मै तप एव साधनमुपदिदेशेति।[13]

सायणाचार्याणाम् मतेऽस्यानुवाकस्य विषयविवेचनं तावत् – "अन्नम् ब्रह्मेति...अभिसंविशन्तीति" इति जगत्कारणलक्षणयोजनेन अन्नस्य ब्रह्मत्वनिश्चयः, "तद्विज्ञाय... तपस्तप्त्वा" इति अन्नस्य ब्रह्मत्वेऽपरितुष्टस्य भृगोः पुनरैकाग्र्यरूपतपआचरणञ्चेति।[14]

लक्षणोपपत्या प्रथमं तावदन्नस्य ब्रह्मत्वम् अवगतवतो भृगोः पुनस्तत्र संशीतिः कथङ्कारमुत्पन्नेति शाङ्करभाष्ये विचारितम्। भगवत्पादैः अन्नस्योत्पत्तिदर्शनमेव तत्र संशयहेतुत्वेन उपात्तम्।[15] सायणाचार्याः शाङ्करमतमनुसरन्त एव अन्नतत्कार्यभूतदेहयोः पूतिगन्धोपलब्धिरन्नस्य ब्रह्मत्वायोगं ज्ञापयतीति मन्यन्ते।[16]

तृतीयानुवाकभाष्यम्।

शङ्करभगवत्पादाः "ऋज्वन्यत्"[17] इत्युक्त्या द्वितीयानुवाकव्याख्यानानुरूपं तृतीयानुवाकस्यापि व्याख्यानं कर्तव्यमिति ज्ञापयन्ति।

सायणाभाष्यानुसारम् अस्यानुवाकस्य विषयविवेकस्तावदेवम् भवति – "प्राणो ब्रह्मेति... अभिसंविशन्तीति" इति जगत्कारणलक्षणयोजनेन प्राणस्य ब्रह्मत्वनिश्चयः, "तद्विज्ञाय... तपस्तप्त्वा" इति प्राणस्य ब्रह्मत्वेऽपरितुष्टस्य भृगोः पुनरैकाग्र्यरूपतपआचरणञ्चेति।[18]

अन्नस्य अब्रह्मत्वं ज्ञात्वा पुनस्तपः कृतवता भृगुणा प्राणस्य कथम् ब्रह्मत्वं निश्चितमिति शङ्कायां शाङ्करभाष्यानुसारं "लक्षणेन

---

7 द्र. "द्वितीयानुवाके ब्रह्मविद्या निरूपिता। अथ तृतीयानुवाके तत्साधनानि निरूप्यन्ते।" – सु.म.तै.सा. (भागः २) पृ.१७३ अत्र द्वितीयानुवाक इति सायणाचार्यैः ब्रह्मानन्दवल्ली, तृतीयानुवाक इति भृगुवल्ली चोच्यते, यतो हि तैः वारुण्याः उपनिषदः द्वौ अनुवाकौ एव यथाक्रमम् ब्रह्मानन्दवल्ली भृगुवल्ली चेति प्रसिद्धौ इति गृह्यते।

8 ब्र.सू.३.४.२३-२४

9. सु.म.तै.सा. (भागः २) पृ.१७३

10 तै.उ.शा.भा. (शा.ग्र. भागः ८) पृ.७३०,७३१

11 सु.म.तै.सा. (भागः २) पृ.१७३-१८२

12 लक्षणस्य अन्ने सङ्गतिरुपपत्तिः।

13 तै.उ.शा.भा. (शा.ग्र. भागः ८) पृ.७३३,७३४

14 सु.म.तै.सा. (भागः २) पृ.१८५,१८६

15 तै.उ.शा.भा. (शा.ग्र. भागः ८) पृ.७३४

16 सु.म.तै.सा. (भागः २) पृ.१८५

17 तै.उ.शा.भा. (शा.ग्र. भागः ८) पृ.७३४

18 सु.म.तै.सा. (भागः २) पृ.१८५,१८६

उपपत्त्या"[19] चेति सकृद्यदुक्तं तदेव समाधानमुपादेयम् भवति। सायणभाष्ये तु ततोऽधिकं व्याख्यानमुपलभामहे। तथा हि, ऐतरेयिणां [20] कौषीतकिनाञ्च [21] श्रुतिमाश्रित्य देहोत्पत्तिहेतुत्वम् प्राणस्य सायणाचार्यैः प्रदर्शितम्। प्राणोत्क्रान्तौ देहस्य विनाश इति युक्तिरप्युल्लिखिता। एवञ्च देहोपादानत्वं नास्ति चेदपि देहस्य जन्मादि त्रितयम् प्राणनिमित्तकमित्यतो लक्षणसङ्गत्या प्राणस्य ब्रह्मत्वनिश्चयः स्यादिति सायणाचार्याणां व्याख्या।[22]

चतुर्थानुवाकभाष्यम्।

शाङ्करभगवत्पादाः द्वितीयानुवाकव्याख्यानानुरूपमेव चतुर्थोऽप्यनुवाको व्याख्येय इति निर्दिशन्ति।[23]

सायणभाष्यानुसारेण अस्यानुवाकस्य विषयविवेचनमित्थम् – "मनो ब्रह्मेति... अभिसंविशन्तीति" इति जगत्कारणत्वलक्षणयोजनेन मनसो ब्रह्मत्वनिश्चयः, "तद्विज्ञाय... तपस्तप्त्वा" इति मनसो ब्रह्मत्वेऽपरितुष्टस्य भृगोः पुनरैकाग्र्यरूपतपआचरणञ्चेति।[24]

प्राणस्य अब्रह्मत्वम् मनसो ब्रह्मत्वञ्च कथं निश्चीयत इति संशयस्य शाङ्करभाष्ये व्याख्यानाभावेऽपि सायणाचार्यैः तद्विशदीक्रियते। तथा हि, जडत्वात् प्राणो न ब्रह्म। "प्रज्ञानम् ब्रह्म"[25] इत्यादिश्रुत्या चेतनमेव ब्रह्मेति ज्ञातम्। ज्ञानशक्तिमन्मनस्तु चेतनमवगम्यते। अपि च यथोक्तम् ब्रह्मलक्षणमपि मनसि सङ्गच्छते। प्रश्नोपनिषच्छ्रुत्या[26] बृहदारण्यकश्रुत्या[27] च हि शरीरे प्राणप्रवेशस्य तत्र स्थितेः ततः प्रस्थानस्य च मनोऽधीनत्वम् अवगम्यते। एवं देहविशिष्टानाम् प्राणिनां जन्मादिहेतुत्वम् मनसोऽस्तीति मनसि यथाश्रुतस्य ब्रह्मलक्षणस्य समन्वयान्मनसो ब्रह्मत्वावगमः।[28]

पञ्चमानुवाकभाष्यम्

शाङ्करभाष्ये द्वितीयानुवाकव्याख्यानानुरूपमेव पञ्चमानुवाकोऽपि व्याख्येय इति निर्दिष्टम्।[29]

सायणभाष्यानुरोधेन अनुवाकस्यास्य विषयविवेकस्तु – "विज्ञानम् ब्रह्मेति... अभिसंविशन्तीति" इति जगत्कारणत्वलक्षणयोजनेन विज्ञानस्य ब्रह्मत्वनिश्चयः, "तद्विज्ञाय... तपस्तप्त्वा" इति विज्ञानस्य ब्रह्मत्वेऽपरितुष्टस्य भृगोः पुनरैकाग्र्यरूपतपआचरणञ्च।[30]

मनसोऽब्रह्मत्वं विज्ञानस्य च ब्रह्मत्वं कथं निश्चीयत इति सन्देहे शाङ्करभाष्यात् समाधानालाभेऽपि सायणाचार्यैः समाधीयते। तथा हि, चक्षुरादिवन्मनसः करणत्वेन कर्तृपरतन्त्रत्वं ततोऽब्रह्मत्वञ्च गम्यते। "विज्ञानं यज्ञं तनुते"[31] इति श्रुतिबलेन विज्ञानात्मनः कर्तृत्वमवगतम्। बृहदारण्यकश्रुतिबलेन [32] किञ्च कृषियुद्धादिकर्मभिः जीवनमरणादिदर्शनाच्च कर्त्रा विज्ञानेन क्रियमाणेन कर्मणैव देहस्य उत्पत्तिस्थितिलयाः सम्भवन्तीति ज्ञात्वा यथाश्रुतब्रह्मलक्षणसाङ्गत्यमपि विज्ञाने बुध्यते। एवञ्च विज्ञानस्य ब्रह्मत्वनिश्चयो भवति।[33]

षष्ठानुवाकभाष्यम्

शाङ्करभगवत्पादीयभाष्यानुसारम् अस्यानुवाकस्य अयमर्थः – ऐकाग्र्याभ्यासरूपेण तपसा विशुद्धसत्त्वो भृगुः आन्तरमान्तरमनुप्रविश्य अन्नप्राणमनोविज्ञानेषु साकल्येन ब्रह्मलक्षणसाङ्गत्यमपश्यन् आन्तरतममानन्दम् ब्रह्म विज्ञातवान्।

19 तै.उ.शा.भा. (शा.ग्र. भागः ८) पृ.७३३

20 द्र. "न ह वा ऋते प्राणाद्रेतः सिच्यते यद्वा ऋते प्राणाद्रेतः सिच्येत पूयेन्न सम्भवेत्।" (ऐ.उ.३.११)

21 द्र. "यावदस्मिञ्शरीरे प्राणो वसति तावदायुः।" (ऐ.उ.३.११)

22 सु.म.तै.सा. (भागः २) पृ.१८६

23 द्र. "ऋज्वन्यत्" – तै.उ.शा.भा. (शा.ग्र. भागः ८) पृ.७३४

24 सु.म.तै.सा. (भागः २) पृ.१८६,१८७

25 ऐ.उ.५.३

26 द्र. "मनोकृतेनायात्यस्मिञ्शरीरे।" (प्र.उ. ३.३) ; "इन्द्रियैर्मनसि सम्पद्यमानैर्यच्चित्तस्तेनैष प्राणस्तेजसा युक्तः सहात्मना यथासङ्कल्पितं लोकं नयति।" (प्र.उ. ३.१०)

27 द्र. "तद्यथा तृणजलायुका तृणस्यान्तं गत्वाऽन्यमाक्रमम् आक्रम्यात्मानम् उपसंहरत्येवमेवायम् आत्मेदं शरीरं निहत्याविद्यां गमयित्वाऽन्यमाक्रमम् आक्रम्यात्मानम् उपसंहरति।" (बृ.उ. ४.४.३)

28 सु.म.तै.सा. (भागः २) पृ.१८६,१८७

29 द्र. "ऋज्वन्यत्" – तै.उ.शा.भा. (शा.ग्र. भागः ८) पृ.७३४

30 सु.म.तै.सा. (भागः २) पृ.१८७,१८८

31 तै.उ. २.५.१

32 द्र. "यत् कर्म कुरुते तदभिसम्पद्यते। पुण्यो वै पुण्येन कर्मणा भवति पापः पापेन।" (बृ.उ. ३.२.१३)

33 सु.म.तै.सा. (भागः २) पृ.१८७,१८८

आख्यायिकामेवमुपसंहृत्य श्रुतिरिमाम् भृगुविदितां वरुणप्रोक्तां विद्याम् भार्गवी वारुणी विद्येति निर्दिश्य अस्याः अन्नमयादात्मनोऽधिप्रवृत्तायाः बुद्धिगुहायाम् परमानन्देऽद्वैते प्रतिष्ठामथवा परिसमाप्तिमाह। य एवं यथोक्तेन तपसा बाह्यान्तःकरणसमाधानरूपेण साधनेन यथोक्तक्रमेण च आन्तरमान्तरमनुप्रविश्य आनन्दम् ब्रह्म वेद स आनन्दे ब्रह्मणि प्रतितिष्ठति, ब्रह्मैव भवति। अस्याः विद्यायाः दृष्टफलञ्च प्रभूतान्नवत्त्वतदत्तृत्वपुत्रपशुब्रह्मवर्चसकीर्तिमत्त्वरूपमाह श्रुतिः।[34]

सायणभाष्यानुरोधम् अस्यानुवाकस्य विषयास्तावत् – "आनन्दो ब्रह्मेति... अभिसंविशन्तीति" इति जगत्कारणत्वलक्षणयोजनेन आनन्दस्य ब्रह्मत्वनिश्चयः, "सैषा भार्गवी... प्रतिष्ठिता" इति अन्नादिभ्यो विज्ञानान्तेभ्यश्चतुर्भ्योऽतिरिक्तमानन्दरूपं यथा तत्त्वं तथैवानन्दादप्यधिकं तत्त्वान्तरमिति शङ्कायाः वारणम्, "स य एवं वेद... महान् कीर्त्या" इति सांसारिकफलकामनया चञ्चलचित्तस्य सांसारिकफलसाधनोक्तिव्याजेन चित्तैकाग्र्यहेतोरुपासनस्य विधानम् अथवा ब्रह्मज्ञानम् प्रति अन्नस्य प्रथमद्वारत्वात् तस्मिन् प्रतीके ब्रह्मदृष्टिरूपस्य उपासनस्य विधानञ्चेति।[35]

विज्ञानस्याब्रह्मत्वम् आनन्दस्य ब्रह्मत्वञ्च भृगुणा कथं निश्चितमित्येतत् शाङ्करभाष्येऽविचारितं सायणाचार्याः निरूपयन्ति। तथा हि, कर्तृत्वस्य क्लेशात्मकत्वात् कर्तृरूपस्य विज्ञानस्य ब्रह्मत्वमयुक्तम्। आनन्दस्य तु क्लेशराहित्यमेव। आनन्दरूपयोः सुषुप्तिसमाध्योः दुःखप्रायजाग्रत्स्वप्नावस्थापेक्षया भूम्नोरद्वैतरूपत्वमपि अनुभूयते। अद्वैतरूपाच्च द्वैतरूपाणां सृष्टिः। द्वैतानुभवस्य चाद्वैतानन्दे लयः। एवञ्च अद्वैतरूप आनन्द आकाशादीनां द्वैतरूपाणाम् भूतानाम् उत्पत्तिस्थितिप्रलयकारणम् उपादानम् भवति। अतश्च ब्रह्मलक्षणसमन्वयाद् आनन्दस्य ब्रह्मत्वं निश्चीयते।[36]

शङ्करभगवत्पादाः षडनुवाकसमन्वितस्य अस्य प्रकरणस्य तात्पर्यं तावत् ब्रह्मजिज्ञासुना बाह्यान्तःकरणसमाधानलक्षणस्य परमस्य तपसोऽनुष्ठेयतेति मन्यन्ते।[37]

षडनुवाकात्मिकायाम् पितापुत्राख्यायिकायाम् भार्गवी वारुणी विद्या आानन्दस्य ब्रह्मत्वनिश्चयेनैव समाप्तिमेतीति दृष्टम्। किमयमानन्दो ब्रह्मानन्दवल्ल्यां श्रुत आनन्दमयकोशः स्याद् आहोस्वित् पुच्छश्रुत्या ज्ञातम् आनन्दस्वरूपमद्वैतम् ब्रह्मैवेति जायते संशयः। शङ्करभगवत्पादैः नैतद्विषयेऽत्रानुवाके चर्चा कृता। तथापि तैरनुवाकेऽस्मिन् श्रुतायाः भार्गव्याः वारुण्याः विद्यायाः फलं तावत् "आनन्दम् ब्रह्म वेद" "प्रतितिष्ठत्यानन्दे परमे ब्रह्मणि" "ब्रह्मैव भवति" इत्येवमादिवचोभिः[38] बोधितम्। अनेन आनन्दस्य ब्रह्मत्वनिश्चयेन ब्रह्मोपलब्धिरेव भवतीति भगवत्पादाः मन्यन्ते इत्यवगम्यते। सायणाचार्यास्तु इदमखिलं स्पष्टीकर्तुम् छान्दोग्यस्य भूमब्रह्मश्रुतिम्[39] उद्धृत्य विचारयन्ति। भूमा यः पदार्थः स आनन्दस्वरूप इति च सिद्धान्तितम्। अनेन विचारेण सायणाचार्याः भूमाधिकरणम्[40] अस्मान् स्मारयन्ति, यत्र छान्दोग्ये श्रुतस्य भूम्नो ब्रह्मत्वमवधारितम्। एवञ्च भार्गव्यां वारुण्यां विद्यायां श्रुत आनन्दः परब्रह्मैवेति प्रदर्श्यते सायणभाष्ये।[41] अग्रेऽपि सायणाचार्याः "आनन्दमयकोशे ब्रह्म पुच्छमित्यभिहितस्य अखण्डैकरसस्यानन्दस्य आत्मत्वेन साक्षात्कृतत्वात् प्रियमोदादिषु चतुर्षु कोशावयवेषु ततः पूर्वेषु च कोशेषु बन्धहेतुषु सर्वेषु स्वात्मत्वभ्रमस्य निश्शेषेण परित्यक्तत्वादयम् मुक्त एव"[42] इत्युक्त्या भृगुणा परब्रह्मेति निश्चित आनन्द एव ब्रह्मानन्दवल्ल्याम् पुच्छश्रुत्या बोधितम् ब्रह्मेति स्फुटीकुर्वन्ति। एवञ्च "ब्रह्म पुच्छम् प्रतिष्ठा"[43] इति वाक्यस्य शाङ्करभाष्येण

34 तै.उ.शा.भा. (शा.ग्र. भागः ८) पृ.७३८,७३९

35 सु.म.तै.सा. (भागः २) पृ.१८८-१९०

36 सु.म.तै.सा. (भागः २) पृ.१८८,१८९

37 तै.उ.शा.भा. (शा.ग्र. भागः ८) पृ.७३८

38 तै.उ.शा.भा. (शा.ग्र. भागः ८) पृ.७३९

39 द्र. "यो वै भूमा तत् सुखं नाल्पे सुखमस्ति भूमैव सुखम्।" (छा.उ. ७.२३.१) ; "यत्र नान्यत् पश्यति स भूमा। अथ यत्रान्यत् पश्यति तदल्पम्।" (छा.उ. ७.२४.१)

40 ब्र.सू. १.३.८-९

41 द्र. "तदेतज्जगत्कारणत्वलक्षणेन लक्षितम् आनन्दम् अद्वैतरूपम् ब्रह्म।" (सु.म.तै.सा., भागः २, पृ.१८९)

42 सु.म.तै.सा. (भागः २) पृ.१९५

43 तै.उ. २.५.१

आनन्दमयाधिकरणोक्तसिद्धान्तेन[44] च भार्गव्या वारुण्या विद्यायाः कथम् ऐकार्थ्यं स्यादिति शङ्काऽपास्ता।

**सप्तमानुवाकभाष्यम्**

शाङ्करभाष्येऽनुवाकस्यास्य अयमर्थो दर्शितः – अन्नेन द्वारभूतेन ब्रह्म विज्ञातमित्यतः गुरुमिव अन्नं न निन्द्यादिति ब्रह्मविदो व्रतम्। अन्नस्य तदधिप्रवृत्तायाम् भार्गव्यां वारुण्यां विद्यायाम् ब्रह्मोपलब्धिद्वारत्वमस्तीति विवक्षया श्रुत्या अन्नानिन्दनव्रतोपदेशं क्रियत इत्यभिप्रायेण भगवत्पादाः प्रकृतव्रतोपदेशस्यान्नस्तुतिपरत्वम्, तत्स्तुतेश्च तदीयब्रह्मोपलब्ध्युपायत्वपरत्वञ्चाहुः। ततः शरीरस्य प्राणस्य च अन्योन्यस्मिन् प्रतिष्ठितत्वम्, अन्योन्यम् अन्नान्नादभावञ्च निरूप्य तथावेदनरूपस्योपासनस्य अन्नान्नादात्मना प्रतिष्ठाम् पूर्वानुवाकोक्तसमानम् अन्नवत्त्वादि दृष्टञ्च फलमाह श्रुतिः।[45]

सायणाचार्याभिप्राये प्रकृतानुवाकस्य विषयविवेकस्तु – "अन्नं न निन्द्यात्। तद्व्रतम्" इति ब्रह्मज्ञानम् प्रति द्वारीभूतत्वात् गुरोरिव अन्नस्यापि अनिन्दनीयत्वस्य विधानम्, "प्राणो वा... महान् कीर्त्या" इति प्राणस्याप्यन्नत्वप्रदर्शनपूर्वकम् अन्नेऽन्नस्य प्रतिष्ठितत्वमित्येवमुपासनान्तरस्य विधानञ्चेति।[46]

सायणाचार्यैः क्वचिच्छाङ्करभाष्यं शब्दत एवानुक्रियते। यथाऽत्रानुवाके "यस्मादन्नेन द्वारभूतेनोपासितेन ब्रह्मज्ञानं लभते तस्मादयमुपासको गुरुमिव अन्नं न निन्द्यात्"[47] इत्युक्तिः।

**अष्टमानुवाकभाष्यम्**

शाङ्करभाष्ये प्रकृतानुवाकोक्तस्य अन्नापरिहारव्रतस्य तात्पर्यमपि पूर्वानुवाकोक्तप्रकारेण ज्ञेयमिति बोधितम्।[48] अब्ज्योतिषोः अन्योन्यस्मिन् प्रतिष्ठितत्वम्, अन्योन्यम् अन्नान्नादभावः, तथावेदनरूपस्योपासनस्य अन्नान्नादात्मना प्रतिष्ठानमिति फलम्, अन्नवत्त्वादि दृष्टम् फलञ्च यथापूर्वं योजनीयमिति च निर्दिशन्ति भगवत्पादाः।[49]

सायणाचार्याभिमते अष्टमानुवाकस्य विषयविवेकस्तावत् – "अन्नं न परिचक्षीत। तद्व्रतम्" इति भोजनकाले प्राप्तस्यान्नस्य असम्यक्त्वबुद्ध्या अपरिहरणीयत्वस्य विधानम्, "आपो वा... महान् कीर्त्या" इति अपामन्नत्वप्रदर्शनपूर्वकम् जलज्योतिषोरन्योन्यप्रतिष्ठितत्वोक्त्या तयोः परस्परान्नत्वम् इत्येवमुपासनान्तरस्य विधानञ्चेति।[50]

**नवमानुवाकभाष्यम्**

शाङ्करभाष्येऽनुवाकोऽयं वाक्येनैकेन व्याख्यातः। अत्र अन्नस्य बहुकरणं व्रतम्, पृथिव्याकाशयोः यथापूर्वम् अन्योन्यम् अन्नान्नादगुणत्वेन उपासनञ्च विहितमिति भगवत्पादैः सङ्क्षेपतो दर्शितम्।[51]

सायणभाष्यानुरोधेन अस्यानुवाकस्य अयं विषयविवेकः – "अन्नम् बहु कुर्वीत। तद्व्रतम्" इति अतिथिभ्यो दानाय अन्नस्य बहुसम्पादनविधानम्, "पृथिवी वा... महान् कीर्त्या" इति पृथिव्या अन्नत्वप्रदर्शनपूर्वकम् मुग्धव्युत्पन्नदृष्टिभेदेन पृथिव्याकाशयोर्मध्ये सम्बन्धभेदोपन्यासेन तयोः परस्परान्नत्वम् इत्येवमुपासनान्तरस्य विधानञ्च।[52]

**दशमानुवाकभाष्यम्**

शङ्करभगवत्पादैः दशमानुवाकस्यार्थ एवम् प्रदर्शितः – पृथिव्याकाशयोः अन्नान्नादगुणत्वेन उपासकः स्ववसतौ वसत्यर्थमागतं न निवारयेत्। वासे दत्ते चावश्यमशनमपि दातव्यमित्यतः विद्वांसोऽभ्यागताय अन्नं संसिद्धमित्येवाचक्षत इत्यतश्च येन केन प्रकारेण बह्वन्नसङ्ग्रहं कुर्यात्। यया वृत्त्या अन्नं

44 ब्र.सू. १.१.१२-१९

45 तै.उ.शा.भा. (शा.ग्र. भागः ८) पृ.७४०,७४१

46 सु.म.तै.सा. (भागः २) पृ.१९०,१९१

47 सु.म.तै.सा. (भागः २) पृ.१९०

48 तै.उ.शा.भा. (शा.ग्र. भागः ८) पृ.७४२

49 तै.उ.शा.भा. (शा.ग्र. भागः ८) पृ.७४२

50 सु.म.तै.सा. (भागः २) पृ.१९१

51 तै.उ.शा.भा. (शा.ग्र. भागः ८) पृ.७४३

52 सु.म.तै.सा. (भागः २) पृ.१९१,१९२

दीयते तया वृत्त्या अन्नं संसिध्यतीति अन्नदानस्य माहात्म्यमस्ति। य एवमन्नस्य यथोक्तम् माहात्म्यं तद्दानस्य फलञ्च वेद तस्य यथोक्तम् फलमुपनमते। अथ ब्रह्मण उपासनप्रकाराः केचनोच्यन्ते। तथा हि, ब्रह्म वाचि क्षेमरूपेण प्रतिष्ठितमित्युपास्यम्।प्राणापानयोर्ब्रह्म योगक्षेमात्मना प्रतिष्ठितमित्युपास्यम्। हस्तयोः कर्मात्मना ब्रह्म प्रतिष्ठितमित्युपास्यम्। पादयोर्गतिरूपेण, पायौ विमुक्तिरूपेण च ब्रह्म प्रतिष्ठितमित्युपास्यम्। एवम् पञ्च मानुष्याणि आध्यात्मिक्यानि विज्ञानान्युपासनानि। तथैव वृष्टौ तृप्त्यात्मना, विद्युति बलरूपेण, पशुषु यशोरूपेण, नक्षत्रेषु ज्योतीरूपेण, उपस्थेन्द्रिये पुत्रामृतानन्दात्मना, आकाशे तत्स्थितसर्ववस्तुरूपेण च ब्रह्मैव व्यवस्थितमित्युपास्यम्। एवं दैव्यान्युपासनानि । अथ ब्रह्मस्वरूपकमाकाशमाश्रित्य कानिचनोपासनानि विधीयन्ते। ब्रह्मस्वरूपकमाकाशं सर्वस्यापि प्रतिष्ठेत्युपास्यम्। अस्योपासनस्य प्रतिष्ठाप्राप्तिरेव फलम्। ब्रह्मस्वरूपकमाकाशम् महत्त्वगुणवद् इत्युपास्यम्। अस्योपासनस्य महत्त्वोपलब्धिरेव फलम्। ब्रह्मस्वरूपकमाकाशम् मन इत्युपास्यम्। एतदुपासनस्य मननसामर्थ्यप्राप्तिरेव फलम्। ब्रह्मस्वरूपकमाकाशं नमनगुणवद् इत्युपास्यम्। एतस्य सर्वविधभोग्यविषयप्रह्वीभाव एव फलम्। ब्रह्मस्वरूपकमाकाशम् परिवृढतमम् इत्युपास्यम्। एतस्य परिवृढतमत्वप्राप्तिरेव फलम्। ब्रह्मस्वरूपकमाकाशम् वाय्वात्मानम् ब्रह्मणः परिमर इत्यपास्यम्। अस्योपासनस्य द्विषत्सपत्नाप्रियभ्रातृव्यमरणमेव फलम्। अथ आकाशाद्यनात्मकार्यप्रपञ्चस्य अन्नान्नादत्वरूपसंसाररूपताम् तत्कार्यप्रपञ्चमनुप्रविष्टवत आत्मनोऽसंसारिताञ्च द्रढयन्ती श्रुतिः जीवपरमात्मनोरैक्यमाह। अनेन आत्मैकत्वविज्ञानेन उत्कर्षापकर्षौ अपोह्य आत्मनोऽविद्याकल्पितानन्नमयादीन् आनन्दमयान्तान् क्रमेण सङ्क्रम्य सत्यज्ञानान्तस्वरूपम् अद्वैतम् ब्रह्म आपन्नः इमान् भूरादीन् लोकान् आत्मत्वेनानुभवन् यथाकामान्नवान् यथाकामरूपवान् च सञ्चरन् स्वानुभूतं सर्वात्मकम् ब्रह्म गायन् स्वस्य ब्रह्मात्मैक्यानुभवम् तदनुभवस्य कृतार्थत्वरूपम् फलञ्च प्रख्यापयन्नास्ते। कथम्। अहो अहमद्वैतो निरञ्जन आत्मापि सन् अन्नम् अन्नादश्च भवामि। किञ्चाहमेव अन्नान्नादयोः पारार्थ्येन हेतुना सङ्घातकृत्। देवानामप्युत्पत्तेः पूर्वम् अस्य मूर्तामूर्तस्य जगतः प्रथमजो हिरण्यगर्भः सन्नहम् भवामि। सर्वेषाम् प्राणिनाम् अमृतत्वम् मत्संस्थम्। यो माम् अन्नरूपम् अन्नार्थिभ्यो ददाति स माम् अवति। योऽर्थिभ्यो माम् अन्नरूपम् अदत्त्वाऽत्ति तमहमन्नरूपोऽद्मि। अहं समस्तम् भुवनम् परेश्वरस्वरूपेण अभिभवामि। आदित्य इव सकृद्विभातो मम प्रकाशः। एवं वल्लीद्वयविहितम् परमात्मज्ञानं शमदमादिभिः साधनैर्यो भृगुवन्महत्तप आस्थाय वेद तस्य मोक्षः फलं स्यादिति।[53]

सायणाचार्यमते दशमानुवाकस्य विषया इमे – "न कञ्चन... तद्व्रतम्" इति निवासार्थं स्वगृहमागतस्य अनिवारणविधानम्, "तस्माद्यया... प्राप्नुयात्" इति यथोक्तव्रतनिर्वाहकस्य उपायस्य विधानम्, "अराध्यस्मा अन्नमित्याचक्षते" इति शिष्टाचारप्रदर्शनम्, "एतद्वै मुखतोऽन्नम्... य एवं वेद" इति बह्वन्नसम्पादने फलातिशयाय दानविशेषे फलविशेषप्रदर्शनम्, "क्षेम इति वाचि... परि येऽप्रिया भ्रातृव्याः" इति अन्येषां केषाञ्चिदुपासनानां विधानम्, "स यश्चायम्... एतत्साम गायन्नास्ते" इति यथोक्तोपासनैरस्मिन् जन्मनि जन्मान्तरे वा चित्तैकाग्र्यम् प्राप्तस्य यद्वेदनीयं यच्च वेदनफलं तदुभयप्रदर्शनम्, "हा३वु... सुवर्न ज्योतीः" इति शिष्योद्देश्यकस्वकीयसर्वात्मत्वप्रकटनफलकस्य सामगानस्य स्वरूपप्रदर्शनम्, "य एवं वेद" इति ब्रह्म पुच्छमितिवाक्येनोक्तमात्मानम् अन्नमयादिद्वारेण साक्षात्कृतवतोऽनेन साम्ना प्रतिपादितः सर्वात्मत्वानुभवः फलतीति प्रदर्शनम्, "इत्युपनिषत्" इति अनुवाकार्थोपसंहारश्चेति।[54]

शाङ्करभाष्यानुसारं वसत्यर्थमागतस्यानिवारणमिति व्रतम् पृथिव्याकाशोपासकसम्बद्धमिति भाति।[55] नैवं सायणभाष्ये भाति।

---

53 तै.उ.शा.भा. (शा.ग्र. भागः ८) पृ.७४४-७५४

54 सु.म.तै.सा. (भागः २) पृ.१९२-१९७

55 द्र. "तथा पृथिव्याकाशोपासकस्य वसतौ वसतिनिमित्तं कञ्चन...।" (तै.उ.शा.भा., शा.ग्र. भागः ८, पृ.७४४)

अत्रोक्तानाम् उपासनानाम् पृथक्त्वमेव सायणाचार्याः लिङ्गम् प्रमाणीकृत्य स्वीकुर्वन्ति।[56]

शाङ्करभाष्ये “तद्ब्रह्मेत्युपासीत” [57] इत्यत्र श्रुतस्य ब्रह्मशब्दस्य परिवृढतमः [58] इत्यर्थः प्रोक्तः। सायणभाष्ये तु तस्य वेद इत्यर्थोऽङ्गीकृतः। तदनुरूपेण च उक्तोपासनस्य ब्रह्मवत्त्वं यत् फलं श्रुतं तस्य स्वाधीनवेदत्वमित्यर्थश्च सायणाचार्यैर्दर्शितः।

शाङ्करभाष्ये तु “तत्प्रतिष्ठेत्युपासीत”[59] इत्यारभ्य “परि येऽप्रिया भ्रातृव्याः” [60] इत्येतत्पर्यन्तस्य उपासनविधानश्रुतिभागस्य केषुचित्स्थानेषूत्पन्नानां शङ्कानां समाधानं न लभामहे। तद्यथा “तत्प्रतिष्ठेत्युपासीत” इत्यादिवाक्येषु तच्छब्दनिर्दिष्टमुपास्यं किम्, पूर्वोक्तमाकाशम् आहोस्विद् ब्रह्म। यद्याकाशं तर्हि “तच्चाकाशम् ब्रह्मैव। तस्मात् तत् सर्वस्य प्रतिष्ठेत्युपासीत।... यद्यत्राधिगतम् फलं तद् ब्रह्मैव। तदुपासनात् तद्वान् भवतीति द्रष्टव्यम्, श्रुत्यन्तराच्च 'तं यथा यथोपासते तदेव भवति' इति”[61] इत्येतस्य भाष्यांशस्य प्रकृतस्थले ब्रह्मण एव तत्तद्गुणतयोपासनप्रख्यापकस्य कथं समन्वयः। यदि नाकाशं तर्हि तदिति शब्देनैव परम्परया विहितेषूपासनेषु किञ्चिदग्रे परिमररूपेणोपासनस्थले साक्षादाकाशशब्दास्याश्रवणेऽपि “स एवायं वायुराकाशेनानन्य इत्याकाशो ब्रह्मणः परिमरः। तस्मादाकाशं वाय्वात्मानम् ब्रह्मणः परिमर इत्युपासीत” [62] इत्यकस्मात् शङ्करभगवत्पादैराकाशशब्दोल्लेखः कृतः। किञ्च “तद्ब्रह्मणः परिमर इत्युपासीत” इत्यत्र ब्रह्मशब्दस्य कोऽर्थः। तस्य च वायुबोधकपरिमरशब्देन कः सम्बन्ध इष्यते शङ्करभगवत्पादैः इत्येवम्। इमाः शङ्काः सायणाचार्यकृते मन्त्रव्याख्याने समाश्रिते तु नोपजायन्ते। सायणभाष्ये तत्प्रतिष्ठेत्युपासीतेत्यत्र तच्छब्दस्य ब्रह्म इत्येवार्थः। ब्रह्मणः परिमर इत्युपासनस्थलेऽपि उपास्यम् यथापूर्वम् ब्रह्मैव स्वीकृतं सायणाचार्यैरिति नास्ति सा शङ्का। ब्रह्मणः परिमर इत्युपासनस्थले श्रुतस्य ब्रह्मशब्दस्य ब्राह्मण इत्यर्थः कृतः सायणभाष्ये। परिमरशब्दस्य च परितो वर्तमानस्य द्वेष्यस्य मृत्युरूप इत्यर्थः। एवञ्च ब्रह्मण्युपास्ये ब्राह्मणशत्रूणाम् मृत्युरिति दृष्टिर्विहितेति व्याख्यातम्। अत एव वायुसम्बद्धशङ्काया अपि नास्ति स्थानम्।

शाङ्करभाष्ये आ सप्तमानुवाकाद् आदशमानुवाकं यान्युपासनानि भ्रातृव्यमरणफलोल्लेखान्तानि श्रुतानि तेषां तात्पर्यम् 'आकाशाद्यनात्मकार्यस्यैव भोज्यभोक्तृत्वकृतः संसारः, आकाशाद्यनात्मकार्याणां कारणस्यात्मनस्तु असंसारित्वम्' इत्येवं नीतम्। आकाशादिकार्यजातस्य यत् कारणं तस्यैवात्मरूपेण कार्येष्वनुप्रवेशं यथाश्रुतं समाश्रित्य अनात्मकारणस्यासंसारिणो जीवरूपेण कार्यजातेऽवस्थितस्य शारीरस्य चैकत्वमाहुर्भगवत्पादाः। अतश्चात्मनोऽसंसारित्वम्। एतद्दृष्ट्यैव श्रुतिः प्रकृतानुवाकेऽपि परमात्मनः शारीरस्य चैकत्वम् बोधयन्ती “स यश्चायम् पुरुषे। यश्चासावादित्ये। स एकः” [63] इत्याहेति भगवत्पादाः मन्यन्ते। सायणाचार्यास्तु आसप्तमदशमानुवाकं विहितानाम् उपासनानां चित्तैकाग्र्यप्राप्तिरेव उद्देश्यं निर्दिशन्ति।[64] एवं चित्तैकाग्र्यम् प्राप्तस्य यद्वेदनीयं तदेव 'स यश्चायम्' इत्यादिवाक्येन बोधयति श्रुतिरिति सायणाचार्याणां व्याख्यानम्।

शाङ्करभाष्ये “यो मा ददाति स इदेव मा३वाः” [65] इत्यस्य वाक्यस्यार्थः 'यो माम् अन्नरूपम् अन्नार्थिभ्यो ददाति स माम् अवति' इत्येवम्प्रकारेण कृतः। ब्रह्मविदो वचनेऽस्मिन् मामिति परमात्मानमित्यर्थो ग्राह्यः। अन्नार्थी कथम् परमात्मानमवतीत्युक्तमिति जायते शङ्का। नास्य समाधानं शाङ्करभाष्ये स्पष्टम्। सायणाचार्यैस्तु तत् स्पष्टीकृतम्। तथा ह्युक्तम् – “य आचार्यो माम् एवंविधपरमात्मानं ददाति शिष्येभ्य उपदिशति स इत् स एव आचार्य एवमुक्तप्रकारेण परमात्मताम्

56 द्र. “बहुवचननिर्देशाद् एकैका पृथगुपासनेत्यवगम्यते।” (सु.म.तै.सा., भागः २, पृ.१९३)

57 तै.उ. ३.१०.४

58 परिवृढः – A master, lord, owner, head, chief.

59 तै.उ. ३.१०.३

60 तै.उ. ३.१०.४

61 तै.उ.शा.भा. (शा.ग्र. भागः ८) पृ.७४७

62 तै.उ.शा.भा. (शा.ग्र. भागः ८) पृ.७४८

63 तै.उ. ३.१०.४

64 द्र. “यथोक्तोपासनैरस्मिञ्जन्मनि जन्मान्तरे वा चित्तैकाग्र्यम् प्राप्तस्य...।” (सु.म.तै.सा., भागः २, पृ.१९५)

65 तै.उ. ३.१०.६

बोधयित्वा शिष्यानवति। अथवा यः पुमान् उदारः सन् मामत्तुम् अन्नरूपम् ब्राह्मणादिभ्यो ददाति स इत् स एवान्नस्य दाता पुरुषो ब्राह्मणादिरूपम् आवाः वक्ष्यमाणप्रकारेण अवन्ति। 'अन्नात् प्राणा भवन्ति' इत्यादिना कार्यपरम्पराम् अन्नजन्याम् आम्नाय 'तस्मादन्नं ददन् सर्वाण्येतानि ददाति' इति याज्ञिक्यामुपनिषदि वक्ष्यते। बोधयितव्यः परमात्मरूपो दातव्यान्नरूपश्च अहमेवास्मि इत्यर्थः।"[66] इति।

भृगुवल्ल्याः शाङ्करसायणभाष्ययोः केचन विशिष्टविचाराः।

तपश्शब्दस्य तात्पर्यकथनपुरस्सरम् ब्रह्मविद्यासाधनप्रदर्शनम्।

शाङ्करभाष्ये तप इत्यस्य बाह्येन्द्रियकरणानामैकाग्र्यमित्यर्थो दर्शितः। तथा हि भगवत्पादैः काचन शङ्का समुत्थापिता। सा यथा, कथम् पित्रा अनुपदिष्टमपि तपः ब्रह्मोपलब्धिसाधनमिति प्रतिपन्नवान् भृगुरिति। भगवत्पादाः सावशेषोक्तिरिति हेतुना शङ्कामिमां समाधत्ते। तद्यथा, ब्रह्म जिज्ञासवे भृगवे साक्षाद् ब्रह्म अनुक्त्वा पिता वरुणः तदुपलब्धिद्वाराण्यन्नादीनि तल्लक्षणञ्च अवोचत्। साक्षाद्ब्रह्मस्वरूपोपदेशस्तु अवशिष्यते। अतः पुत्राय भृगवे पितुर्वरुणस्य ब्रह्मविषयिणी उक्तिः सावशेषा। सावशेषोक्तिश्च साधनान्तरापेक्षायाम् उपपद्यते[67]। 'इतोऽपि मया साधनं किमप्यनुष्ठेयम्, अननुष्ठिते तस्मिन् पिता मह्यम् अवशिष्टमुपदेशं न करिष्यति' इति हि भृगुरवागच्छत्। तच्च साधनं तप इति भृगुणा लोकप्रसिद्धिबलेन प्रतिपन्नम्। तपश्च तत् पुनर्मनस इन्द्रियाणाञ्चैकाग्र्यरूपमिति स्मृतिवाक्यम्[68] उद्धृत्य शङ्करभगवत्पादैर्बोधितम्।

सायणभाष्ये अस्य तपसः शाङ्करभाष्ये ऐकाग्र्यार्थकत्वेन व्याख्यातस्य संन्यासाश्रमधर्माचरणमित्यर्थोऽपि प्रोक्तः।[69] ननु किमर्थमेवं व्याख्यानमपेक्षितम् मन्यन्ते सायणाचार्यैरिति चेद् ब्रह्मलक्षणादिश्रुतिविचारस्य कर्तव्यताख्यापनायेति ब्रूमः। तथा हि श्रवणमननादेः ब्रह्मविद्यान्तरङ्गसाधनत्वं सायणाचार्यैरङ्गीकृतम्। तच्चात्र वल्ल्यां श्रुत्या विवक्षितमित्यपि प्रोक्तम्।[70] परन्तु न हि श्रुतिः भृगुवल्ल्यां श्रवणमननादिकं साक्षाद्विधत्ते। "तद्विजिज्ञासस्व"[71] इति तूपदिष्टम्। अस्य च वाक्यस्य ब्रह्मविचारविधानपरता व्याख्याता।[72] भृगुणा यथाविहितमेवाचरितमित्यर्थोपन्यासेन तामेव उपोद्बलयितुं सायणाचार्याः प्रथमम् तपश्शब्दस्य आश्रमकर्मार्थत्वम्[73], ततः प्रसङ्गानुसारम् ऊर्ध्वरेतआश्रमकर्मार्थत्वञ्च[74] वदन्ति। कर्मान्तरसंन्यासपूर्वकमुपसद्य गुरुसन्निधौ ह्यैकाग्र्येण समनुष्ठीयमानं श्रवणमननादिकं साधिष्ठम् प्राप्नुयादित्यर्थजातश्चैवं व्यज्येत। एतदखिलं साधयितुं जिज्ञासाधिकरणम्[75], जन्माद्यधिकरणम्[76], शास्त्रयोनित्वाधिकरणम्[77], समन्वयाधिकरणम्[78], अनाविष्काराधिकरणम्[79], सहकार्यन्तरविध्यधिकरणम्[80], आवृत्त्यधिकरणम्[81], परामर्शाधिकरणम् प्रथमवर्णकम्[82], तद्भूताधिकरणम्[83],

---

66 सु.म.तै.सा. (भागः २) पृ.१९६

67 अर्थापत्तिप्रमाणञ्चात्र द्रष्टव्यम्।

68 म.भा. १२.२४२.४

69 द्र. "अत्र तपश्शब्देन ऊर्ध्वरेतसाम् आश्रमाणां धर्मो विवक्षितः" – सु.म.तै.सा. (भागः २) पृ.१८२

70 द्र. "यद्यपि सांहित्यामुपनिषदि [शीक्षावल्ल्यामिति यावत्] बहिरङ्गसाधनानि कर्माण्युपासनानि चाभिहितानि तथापि विचाररूपमन्तरङ्गसाधनं नोक्तमिति तदत्राभिधीयते।" – सु.म.तै.सा. (भागः २) पृ.१७३

71 तै.उ.३.१.१

72 द्र. "...जगदुत्पत्तिस्थितिलयकारणं वस्तु विचारय।" – सु.म.तै.सा. (भागः २) पृ.१७४

73 द्र. "तपश्शब्देनाश्रमचतुष्टयधर्मो विवक्षितः।" – सु.म.तै.सा. (भागः २) पृ.१८२

74 द्र. "अत्र तपश्शब्देन ऊर्ध्वरेतसाम् आश्रमाणां धर्मो विवक्षितः।" – सु.म.तै.सा. (भागः २) पृ.१८२

75 ब्र.सू.१.१.१

76 ब्र.सू.१.१.२

77 ब्र.सू.१.१.३

78 ब्र.सू.१.१.४

79 ब्र.सू.३.४.५०

80 ब्र.सू.३.४.४७-४९

81 ब्र.सू.४.१.१-२

82 ब्र.सू.३.४.१८-२०

83 ब्र.सू.३.४.४०

आधिकारिकाधिकरणम्[84], बहिरधिकरणम्[85], परामर्शाधिकरणस्य द्वितीयवर्णकञ्च[86] समाश्रित्य मीमांसा सायणभाष्ये विहिता।[87]

किञ्च तपसः पौनःपुन्येनोपदेशस्य कारणमपि शाङ्करभाष्ये चिन्तितम्। ब्रह्मावगतिसाधनेषु अग्रगण्यं तपआख्यम् ऐकाग्र्यमित्यत एव तदुपदेशस्य पौनःपुन्यमिति भगवत्पादाः। यथोक्तस्य ब्रह्मलक्षणस्य सातिशयत्वम् ब्रह्मजिज्ञासाया अनिवृत्तिश्च यावदनुवर्तते तावद् ऐकाग्र्यमाश्रित्य ब्रह्मतत्त्वावगत्यै विचारस्य कर्तव्यताम् भगवत्पादाः बोधयन्ति।[88] सायणाचार्यास्तु तपसः पौनःपुन्योपदेशविषये किमप्यनुक्त्वापि साक्षाद्ब्रह्मोपदेशस्य स्थाने तपसः कर्तव्यतां श्रुतिः कस्मादुपदिशतीति विचारयन्ति। सत्यज्ञानानन्तादिस्वरूपलक्षणेन ब्रह्मणि बोधिते धर्माधर्मवद् ब्रह्मापि शब्दप्रमाणगम्यम् मत्वा श्रोता परोक्षमेव तदिति कल्पयेत्। तन्मा भूदिति तप उपदिष्टम्। ऐकाग्र्येण विचार्यमाणे त्वपरोक्षतया ब्रह्मानुभूयत एवेत्यतः तपसः कर्तव्यता बोधिता श्रुत्येति सायणाचार्याणामाशयः।[89] अपि च तपसो ब्रह्मत्वं यच्छ्रुतं तद् भगवत्पादैरव्याख्यातमपि सायणाचार्याः सूक्ष्मदर्शितया विशदयन्ति। ब्रह्मस्वरूपावगतिम् प्रत्यन्तरङ्गसाधनं तप इति विवक्षया ब्रह्मतपसोरभेद उपचर्यत इति सायणभाष्यम्।[90]

### भाष्यग्रन्थस्य पाठो विभागश्च

शाङ्करभाष्ये क्वचित् प्रसिद्धस्य पाठस्य साधुत्वशङ्का उपजायते। तद्यथा भृगुवल्ल्याः दशमानुवाकस्य षष्ठमन्त्रस्य व्याख्यानावसरे भगवत्पादीयम् भाष्यमित्थम् प्रथते – "प्रथमजाः प्रथमजः प्रथमोत्पन्नः। ऋतस्य सत्यस्य मूर्तामूर्तस्यास्य जगतो देवेभ्यश्च पूर्वममृतस्य नाभिः अमृतत्वस्य नाभिः, मध्यम् मत्संस्थम् अमृतत्वम् प्राणिनामित्यर्थः" [91] इति। अत्र मूलमन्त्रानुसारेण तात्पर्यावगमनं सुदुष्करम् पठितॄणाम्। अत्र सायणभाष्यनुसरणेन तु तात्पर्यरक्षा साधुपाठोपलब्धिश्च अनायासेन भवति। उद्धृतस्यास्य शाङ्करभाष्यांशस्य साधुपाठस्तु – "प्रथमजाः प्रथमजः प्रथमोत्पन्नः ऋतस्य सत्यस्य मूर्तामूर्तस्यास्य जगतो देवेभ्यश्च पूर्वम्। अमृतस्य नाभिः अमृतत्वस्य नाभिः, मध्यम् मत्संस्थम् अमृतत्वम् प्राणिनामित्यर्थः" इति स्यात्।

सायणाचार्याः ब्रह्मानन्दभृगुवल्ल्योः एकोपनिषत्त्वम् मेनिरे। वारुणी इति तस्याः संज्ञा। वारुण्युपनिषदोऽनुवाकद्वयम्। प्रथमानुवाको ब्रह्मानन्दवल्लीति, द्वितीयानुवाकश्च भृगुवल्लीति प्रसिद्धा। एवम् उपनिषद्विभागे सायणाचार्याभिमते स्थिते तैः प्रणीतस्य भाष्यस्यापि तदनुसारी विभागो युक्तः। किन्तु सम्पादकाः नैतद् अवलम्बन्ते। अनेन को दोषः। उच्यते। सायणाचार्यैः सम्पूर्णायाः ब्रह्मानन्दवल्ल्याः भृगुवल्ल्याश्च एकानुवाकत्वम् मत्वा कृताः विचाराः स्थानान्तरिताः जाताः। सुप्रियामहाजनमहोदयया जमुनापाठकमहोदयेन च शाङ्करभाष्यप्रसिद्धानुवाकविभाजनपद्धतेः आश्रितत्वात् ताभ्यां सम्पादितयोः सायणभाष्यग्रन्थयोः ब्रह्मानन्दभृगुवल्ल्योरुभयोरपि आदिमध्यान्तम् भाष्यांशाः मूलस्थानाद् भ्रष्टाः जाताः।[92]

### अध्ययनोपसंहारः

ब्रह्मविद्या ब्रह्मानन्दवल्ल्यामेव परिसमाप्तेति [93] मन्यमानैरपि शङ्करभगवत्पादैः भृगवल्ल्याः पितृपुत्राख्यायिकाभागस्य पूर्ववल्ल्युक्तविद्याशेषत्वम् अङ्गीक्रियते। [94] सायणाचार्यैस्तु ब्रह्मानन्दभृगुवल्ल्योरेकोपनिषत्त्वमेव स्वीक्रियत इति सङ्गतम्।

84 ब्र.सू.३.४.४१-४२

85 ब्र.सू.३.४.४३

86 ब्र.सू.३.४.१८-२०

87 सु.म.तै.सा. (भागः २) पृ.१७५-१८५

88 तै.उ.शा.भा. (शा.ग्र. भागः ८) पृ.७३४

89 सु.म.तै.सा. (भागः २) पृ.१८६

90 सु.म.तै.सा. (भागः २) पृ.१८५,१८६

91 तै.उ.शा.भा. (शा.ग्र. भागः ८) पृ.७५२

92 द्र. "सर्वथाऽपि श्रूयमाणम्... स्वाध्यायपूर्वकमैकाग्र्यरूपं तपः कृतवान्" (सु.म.तै.सा., भागः २, पृ.१८०) इत्यंशः "स तपोऽतप्यत" (तै.उ.३.१.१) इति श्रुतेः व्याख्यानभूतोऽपि स्थानान्तरितो जातः। एवमग्रेऽपि बहुत्र।

93 द्र. "...इत्येवम् आनन्दवल्ल्यां विवक्षितोऽर्थः। परिसमाप्ता च ब्रह्मविद्या। अतः परम् ब्रह्मविद्यासाधनं तपो वक्तव्यम्..." – तै.उ.शा.भा. (शा.ग्र. भागः ८) पृ.७२९

94 द्र. "तत्र पितापुत्राख्यायिकायाम् पूर्वविद्याशेषभूतायां तपो ब्रह्मविद्यासाधनमुक्तम्" – तै.उ.शा.भा. (शा.ग्र. भागः ८) पृ.७५०

प्रायेण शाङ्करभाष्यमेवानुसरन्त एव सायणाचार्याः शाङ्करभाष्ये संक्षेपेणोक्तं समुपबृंहयन्तः, विस्तारितं सङ्क्षिपन्तः, अविचारितविचारणीयं विचारयन्तः, अर्थान्तरमपेक्षमाणं तद्दिशा नयन्तश्च भार्गवीं वारुणीं विद्यां सुष्ठु व्याख्यान्तीति सिद्धम्। शाङ्करसायणभाष्ययोः वेदान्तव्याख्यानप्रक्रियागतभेदास्तु नात्र वल्ल्याम् परिलक्ष्यन्ते॥

**सङ्केताक्षरसूची**

ऐ.उ. – ऐतरेयोपनिषत्।

छा.उ. – छान्दोग्योपनिषत्।

तै.उ. – तैत्तिरीयोपनिषत्।

तै.उ.शा.भा. – तैत्तिरीयोपनिषच्छाङ्करभाष्यम्।

द्र. – द्रष्टव्यम्।

पृ. – पृष्ठसङ्ख्या।

प्र.उ. – प्रश्नोपनिषत्।

बृ.उ. – बृहदारण्यकोपनिषत्।

ब्र.सू. – ब्रह्मसूत्रम्।

म.भा. – महाभारतम्।

शा.ग्र. – श्रीशाङ्करग्रन्थावलिः।

सु.म.तै.सा. – सुप्रियामहाजनसम्पादित-तैत्तिरीयारण्यक-सायणभाष्यम्।

आश्रितग्रन्थसूची।

**संस्कृतग्रन्थाः।**


1. शास्त्री, जगदीशलालः (सम्पादकः)। ब्रह्मसूत्रशाङ्करभाष्यम्। मोतीलाल् बनारसीदास्। देहली। १९८० (पुनर्मुद्रणम्)।
2. उपाध्यायः, बलदेवः (सम्पादकः)। वेदभाष्यभूमिकासङ्ग्रहः। चौखम्बा-संस्कृत-सीरीस्-आफीस्। वाराणसी। १९३४.
3. बालसुब्रह्मण्यन्, टि के (सम्पादकः)। श्रीशाङ्करग्रन्थावलिः, १० भागाः (Complete Works of Sri Sankaracharya, 10 Volumes)। समता-बुक्स्। चेन्नै। १९९९ (प्रथममुद्रणम् १९१०)।
4. महाजनः, सुप्रिया (सम्पादिका)। तैत्तिरीयारण्यकम् (सायणभाष्यसहितम्) [आनन्दाश्रमसंस्कृतग्रन्थावलिः, ग्रन्थाङ्कः ३६/२]। पुणे। २०१६ (तृतीयसंस्करणम्)।


**आङ्ग्लग्रन्थाः।**


5. Nakamura, Hajime. A History of Early Vedanta Philosophy (in two parts). Motilal Banarsidass. Delhi. 2004.
6. Apte, Vaman Shivram. The Practical Sanskrit-English Dictionary. Motilal Banarsidass. Delhi. 1998 (First Edition: 1965).


**अन्तर्जालमूलानि।**


7. <https://advaitasharada.sringeri.net/> as accessed on 27th August 2019 at 2.40 PM. <https://sa.wikisource.org/wiki> as accessed on 09th September 2019 at 1.00 PM.